# अव्ययानि

यत् न व्येति तदव्ययं । अर्थात् लिङ्गे वचने विभक्तौ च यस्य रूपभेदः न भवति तदव्ययम्। व्येति इत्यस्य परिणमति इत्यर्थः।

उक्तं च –

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।

वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्।। इति।

त्रिषु लिङ्गेषु, सर्वासु विभक्तिषु, सर्वेषु वचनेषु च परिणामं विना यत् तिष्ठति तत् अव्ययम्। आव्ययानि समस्तपदानि, तद्धितप्रत्ययान्तानि, केवलानि वा भवन्ति।

समस्तपदानि –अधिहरि , सध्येसार्गम्, आपादचूडम्, चेत्येवमादीनि(अव्ययीभावः)

तद्धितप्रत्ययाः–सर्वदा, सर्वत्र, सर्वथा, अल्पशः इत्येवम्।

केवलानि–स्वर्,च,प्र–आदीनि।

केवलानि अव्ययानि प्रादयः, गतयः,स्वरादयः,चादयः इति गणक्रमेण अत्र उपस्थाप्यन्ते।

**प्रादयः**

1. प्र – पुरतः, आधिक्यं, शक्तिः, साहित्यं, श्रेष्ठं इत्यादिषु अर्थेषु अस्य प्रयोगः क्रियते ।

प्रगतिः – पुरोगतिः

प्रबलः – प्रमत्तः, प्रचण्डः, प्रकोपनं(आधिक्यार्थे शक्यर्थे च )

प्रपर्णः – प्रतितानि पर्णानि यस्मात् सः । प्रपतितपर्णः इति वा । (राहित्यार्थे)

प्राचार्यः – श्रेष्ठः आचार्यः ।

2. परा – शक्तिविपरीतवियोगार्थेषु प्रयुज्यते ।

शक्तिः – पराक्रमः

विपरीतार्थे–पराजयः ।

वियोगार्थे –परागतः, परास्तः इति वा ।

3. अपा –अस्य प्रयोगः वियोग – न्यूनता – राहित्यार्थेषु भवति ।

वियोगः–अपगच्छति, अपासनं –दूरीकरणमिति ।

न्यूनता– अपवदति, अपशब्दः।

राहित्यम् – अपभयम्,अपकल्मषम्।

4. सम् – यौगपद्य– आधिक्य–भूषण–सामीप्यार्थेषु ।

सङ्गमः,सम्भाषणम्      (यौगपद्यार्थे)

सन्तोषः, सन्तापः (आधिक्यार्थे)

संस्करोति(भूषणार्थे)

समक्षम्(समक्षार्थे,सामीप्यार्थे)

5. अनु  – पश्चाद् – प्रत्येकार्थे

अनुगच्छति, अनुबन्ध्नाति।

अनुनिमिषम्,अन्वहम्,अन्वक्षम्।

6. आ – विपरीत–मर्यादाल्पाद्यर्थेषु

आगच्छति, आनयति – विपरीतार्थे।

आमरणम्, आबालम् – मर्यादार्थे।

आपाण्डुरम् – अल्पार्थे।

आच्छादनम् – सर्वतः।

7. वि – वियोगविपरीतराहित्याधिक्यार्थेषु

वियोगः,विकर्षणम् – वियोगार्थे।

विक्रयः,विस्मरणम् – विपरीतार्थे।

विमलः,विजनः – राहित्यार्थे।

विध्वंसनम् – आधिक्यार्थे।

विविधम्,विचित्रम् – भेदार्थे।

8. निस् – निर् – राहित्य – वियोगपूर्णार्थेषु।

निरर्थः, निश्शब्दः – राहित्यार्थे।

निर्गच्छति,निष्क्रमणम् – वियोगार्थे।

निर्मार्जनम्,निर्वहणम् – पूर्णार्थे।

9. दुस् – दुर्  – न्यूनतावैषम्यार्थयोः

दुर्लभः, दुश्शकुनः – न्यूनतार्थे।

दुष्करः, दुस्सहः – वैषम्यार्थे।

10. प्रति – अभिमुखप्रतिकूलवीप्साद्यर्थेषु

प्रत्यग्नि– अग्नेरभिमुखम्।

प्रतिक्रिया – प्रतिकार–प्रतिकूलार्थे।

प्रतिवचनम् – अभिमुखार्थे।

प्रतिवर्षम्, प्रत्येकम् – वीप्सार्थे।

11. सु – उत्तम – सौन्दर्य – सुकरार्थेषु

सुगन्धः,सुचिन्तितम् – उत्तमार्थे।

सुलोचना, सुकेशिनी – सौन्दर्यार्थे।

सुलभः, सुगमः – सुकरार्थे।

12. परि – सामीप्याधिक्यार्थे

परिचारकः, परिवर्तनम्– सामीप्यार्थे।

परितापः, परितोषः – आधिक्यार्थे।

13. अपि – प्रायेण अस्य प्रयोगः वैदिकसंस्कृते भवति। लौकिकसंस्कृते तु विरलतया च।

अपिधानम्, पिधानम्। अपिहितम्, पिहितम्।अवगाह्य, वगाह्य। (अपि, अव इत्येतयोः अकारस्य लोपः अपि भवति)

14. अभि – प्रत्यक्षे आधिक्ये च

अभिगच्छति, अभिमुखम्, अभ्यग्नि – प्रत्यक्षार्थे।

अभिषेचनम्, अभिजातः, अभिमानः, अभिनवः,अभिकम्पनम् – आधिक्यार्थे।

15. नि – आधिक्ये ।

निपतति, निक्षिपति, निकरः, निग्रहः, निरोधः, नियोजयति, निकृतिः, निगूढम्।

16. उप – सामीप्यमर्यादाद्यर्थेषु

उपक्रमः – उपकारः।

उपविशति, उपगच्छति – सामीप्यार्थे।

उपकण्ठम् , उपशरदम्, उपचारः, उपस्कृतिः– मर्यादार्थे।

उपरमः उपरतः, उपग्रहः, उपाध्यक्षः – सामीप्यार्थे।

17. अव – (दृढनिन्दाद्यर्थेषु)

अवधारणम्, अवगाहः– दृढार्थे।

अवज्ञा – निन्दार्थे।

18. अति – (अतिशयार्थे)

अतिक्रमः,अतिमानुषः, अतिक्रूरम्।

19. उत् – औन्नत्यार्थे । उत्पतति, उन्मुखः,उत्पन्नम्, उद्धरति, उत्सृजति,उद्गतप्राणः।

20. अधि – आधिक्यार्थे । अधिवसति,अधिकेरलम्, अधिकृत्य, अधिरुह्य, अधिराजः, अधिदेवता, अधिकारः।

**स्वरादयः।**

स्वर् – स्वर्गः।

अन्तर् – अन्तर्भवति।

प्रातर् – प्रातः।

पुनर् – पुनर्गच्छति।

उच्चैस् – उच्चैर्वदति।

नीचैस् – नीचैः स्रवति।

शनैस् – शनैर्वदति।

आराद् – गृहाद् आराद्।

युगपत् – सूर्यचन्द्रौ युगपत् संदृश्येते।

पृथक् – पृथक् रूपम्।

ह्यः – ह्यः रविवारः।

श्वः – श्वः सोमवारः।

दिवा – दिवा पश्यति नोलूकः।

रात्रौ – रात्रौ कथाकेलिः।

सायम् – सायं सूर्यास्तमयः । अस्तमनम् इति।

चिरम् – चिरं मङ्गलं भूयात्।

मनाक् – मनाक् भाषणम्।

ईषत् – ईषद् रोदनम्

जोषम् – जोषम् आस्ते।

तूष्णीम् – तूष्णीं तिष्ठति।

समया – विद्यालयं समया क्रीडाङ्गणं वर्तते।

बहिः – वनात् बहिः मृगाः न गच्छन्ति।

अधस् – वृक्षस्य अधः तृणानि सन्ति।

स्वयम् – स्वयं चोदितः।

मृषा – मृषाभाषणं मास्तु।

नक्तम् – नक्तं स्वापः।

न – विद्या चोरहार्या न।

हेतौ – अधर्महेतौ दण्डयति।

सामि – सामिपीतम्(अर्धमिति)

अन्तरा – त्वां मां च अन्तरा पुस्तकं वर्तते । गोपिकाम् अन्तरा माधवः मध्यार्थे। जलम् अन्तरेण जीवनम् अशक्यम् (विनार्थे) ।

मामन्तरा/अन्तरेण स किमपृच्छत्।

सहसा – सहसा विदधीत न क्रियाम्।

विना – वायुं विना कथं जीवति ।

नाना – नाना नारीं निष्फलं कुटुम्बम् ।

स्वस्ति – स्वस्त्यस्तु ते ।

स्वधा – पितृभ्यः स्वधा ।

अलम् – तृप्त्यै अलम् ।

वषट् – इन्द्राय वषट् ।

स्वाहा – अग्नये स्वाहा ।

अस्ति – हिमालयः भारतस्य उत्तरभागे अस्ति ।

पुरा – पुरा कवीनां गणनाप्रसङ्गे ।

मिथः – मिथः भाषणम् ।

सह, समं, सार्धं, साकम् – मित्रेण साकं (सह शब्दं विहायापि प्रयोक्तुं शक्यते । उदा – मित्रेण गच्छति । )

**चादयः।**

च – समुच्चय – अन्वाचय – इतरेतरयोग – समाहारार्थेषु च प्रयुज्यते ।

ईश्वरं गुरुं च भजस्व – समुच्चयः ।

भिक्षामट् गां चानय – अन्वाचयः ।

रामश्च कृष्णश्च (रामकृष्णौ ) – इतरेतरयोगः ।

पाणी च पादौ च (पाणीपादं ) – समाहारः।

1. वा – सत्यं वा मिथ्या वा ।
2. ह – इन्द्रो देवराज ह ।
3. एव – सत्यमेव जयते ।
4. एवम् – एवम् अवदत् ।
5. नूनम् –नूनं वृष्टिः भवेत् ।

6. शश्वत् –शश्वत् मङ्गलं भूयात् ।

7. चेत् –सत्यं चेत् वद ।

8. हन्त –हन्त! विधिविलासः ।

9. माकिम् –क्रीडाङ्गणे माकिं शतं जनाः क्रीडन्ति ।

10.माङ्(मा) –मा वद । मा गम ।

11.नञ्(न) –न सत्यम् । असत्यम् । नैकम् । नगः ।

12.किल – चन्द्रः तारापतिः किल?

13.स्म – वदति स्म।

14.पुरा – पुरा महाबलिर्नाम राजा आसीत्।

15.धिक् – धिक् अनृतभाषिणम्।

16.अहो – अहो ईश्वरविलासः।

17.खलु –विजयः उद्यमशीलानां खलु ?

18.मृधा –जल्पनम् मृधा

19.न हि –नहि नहि रक्षति डुकृञ् करणे ।

20.कुत्र – वासस्थलं कुत्र ?

21.कुतः –अमित्रस्य कुतः सुखम् ? कुतः आयाति ?

**तद्धितप्रत्ययान्तानि**

अकस्मात् – अकस्मात् वृष्टिरभवत् ।

अग्रतः/अग्रे – वृक्षस्य अग्रतः फलं पतति ।

अचिरं/अचिरात्/अचिरेण/अचिराय

– सः अचिरादेव आगमिष्यति । अचिरेण कार्यं करु ।

अजस्रम् – मन्दिरात् अजस्रं नामसङ्कीर्तनं श्रूयते ।

अत्र – अत्र जलं नास्ति ।

इतस्ततः – मृगाः वने इतस्ततः भ्रमन्ति ।

इतः – इतः मा गच्छ ।(अस्मात् स्थानात्)

इदानीम् – इदानीम् अहं पठिष्यामि ।

इह – इह सर्वे तोषेण वसन्ति ।

एकत्र – जनाः नगरे एकत्र सम्मिलन्ति ।

एकदा – एकदा भरतः भारतम् अपालयत् ।

कथञ्चन/कथञ्चित् – युवकः कथञ्चन वृक्षम् आरोहति ।

कदाचित् – कदाचित् वृष्टिः भवेत् ।

**केवलानि।**

अतीव – चन्द्रः पौर्णम्याम् अतीव शोभते ।

अथ – अथ, किं कार्यम् ?

अथ किम् ? – एकः –'देवालयं गच्छावः' ।

अपरः –'अथ किम् ?'

अद्य – अद्य रविवारः ।

अधः/अधस्तात् – वृक्षस्य अधः धेनुः चरति ।

अधुना – अधुना यानम् आगमिष्यति ।

अनिशम् – घण्टानादः अनिशं श्रूयते ।

अन्तः – सिंहः गुहायाः अन्तः स्वपिति ।

आशु – भिक्षुकः भिक्षां प्राप्य आशु गतवान् ।

आशुभाषणं पाण्डित्यलक्षणम् ।

इति –'पयः ददातु' इति बालोऽवदत् ।

इत्थम् – इत्थं व्रतं धारयतः राज्ञः एकविंशतिः दिनान्यतीतानि ।

एव – बालाः मात्रा निर्दिष्टमेव प्रायः कुर्वन्ति ।

एवम् – बालिका गायति ।एवमेव शुकोऽपि ।

कथम् – वयं कथं सत्यं पालयेम ?

कथमपि – राधा कथमपि श्लोकं हृदिस्थं करोति ।

कदा – पिता कदा आगमिष्यति ।

**समुच्चयनिपाताः।**

अथ – मङ्गलानन्तरारम्भप्रश्नकात्स्न्र्येष्वे अथ(अथो इति ओकारान्तः निपातः)

– अथ योगानुशासनम् (मङ्गलम्)

– अथातो ब्रह्मजिज्ञासा (अनन्तरम्)

– आत्मा नित्यः अथ अनित्यः ? (प्रश्नः)

– पितॄनथ पितामहान् (कात्स्न्र्यम्)

इति – "तवाज्ञां पालयामी"ति स मामुवाच ।

– वक्तुं सुकरं कर्तुं दुष्करमिति ।

किं – किं तेन दुर्मन्त्रिणा ?

– किं तया बालिकया ?

किमपि – किमपि कमनीयं वपुरिदम्।

किमर्थं – किमर्थोऽयं यत्नः ?

किं वा – किं वा शकुन्तलेत्यस्य मातुराख्या ।

किमु – यौवनं धनसंपत्तिः प्रभुत्वमविवेकिता ।

– एकैकमप्यनर्थाय किमु यत्र चतुष्टयम् ।

चेत् – सुखार्थी चेत् त्यजेद्विद्यां

विद्यार्थी चेत् त्यजेत्सुखं ।

– सर्वं विमृश्य कर्तव्यं नो चेत् पश्चात्तापं व्रजिष्यसि ।

– सम्पद् सखा, दरिद्रता तु कृच्छ्रम्।

– नीलाकाशस्तु सुन्दरः ।

– मृष्टं पयो मृष्टतरं तु दुग्धं ।

– भीमस्तु पाण्डवानां रौद्रः ।

वाक्यद्वयस्य योजनाय कानिचन अव्ययानि साहाय्यकानि भवन्ति । यथा – यदा–तदा, यदि– तर्हि, यथा–तथा, यावत्–तावत्, यत्र–तत्र इत्यादीनि ।

प्रयोगपरिचयाय उदाहरणानि दीयन्ते।

यदा – तदा – यदा सिंहः आगच्छति तदा मृगाः धावन्ति।

यदा वर्षम् आरभते तदा वनिता छत्रम् उद्घाटयति।

यदा मेघाः वर्षन्ति तदा मयूराः नृत्यन्ति।

यदि – तर्हि – यदि आरोग्यम् इच्छति तर्हि व्यायामः करणीयः।

यदि सम्यक् पठिष्यति तर्हि विजयी भविष्यति।

यथा – तथा – यथा अश्वः धावति तथा बालिका धावति।

यथा सुहृद् उपदिशति तथा पुराणानि उपदिशन्ति।

यावत् – तावत् – यावत् निधिदर्शनं तावत् खननम्।

यावत् त्वं लिखसि तावदहम् उपविशामि।

यदा – कदा – अहं यदा कदा उपवनं गच्छामि।

मातामही यदा कदा पुराणं पठति।

यत्र – तत्र – यत्र यत्र मधु तत्र तत्र मधुमक्षिका।

यत्र मालिन्यं तत्र दुर्गन्धः।

यद्यपि – तथापि – यद्यपि गणेशः भिषग्वरः तथापि सः निष्करुणः।

यद्यपि विभीषणः राक्षसः तथापि विष्णुभक्तः आसीत् ।

वाक्येषु मुख्यक्रियायाः पूर्वमनन्तरं वा विद्यमानानां क्रियाणां पृथग्भावप्रदर्शनाय क्त्वा , ल्यप् , तुमुन् इत्येते प्रत्ययाः प्रयुज्यन्ते । एतान्यपि अव्ययानि भवन्ति ।

मुख्यक्रियायाः पूर्वं क्त्वा , ल्यप् , प्रत्ययौ, तथा मुख्यक्रियायाः परं तुमुन् प्रत्ययश्च भवन्ति।

मन्दिरं गत्वा देवपूजां करोति ।

बालः क्षीरं पातुं महानसं प्राविशत् ।

एते शब्दाः (क्त्वा – ल्यप् – तुमुन्) प्रधानक्रियाकर्तारम् एव आश्रयन्ते।

**यथा** –वत्सः धेनुम् उपगम्य क्षीरं पिबति । अत्र उपगमनं पानं च समानकर्तृकम्। धातोः उपसर्गयोगे क्त्वा प्रत्ययस्य स्थाने ल्यप् प्रयोक्तव्यः।

क्त्वान्ताव्ययानि – धेनु तृणं चरित्वा जलं पिबति ।

– गृहं गत्वा पाठं पठति ।

– छात्रः गुरुं नत्वा कक्ष्यां प्रविशति ।

ल्यबन्ताव्ययानि – कविः कवितां विलिख्य सम्पादकाय ददाति ।

– योगी हरिनामं सञ्जप्य तिष्ठति ।

– पुत्रः मातरम् अनुगम्य मोदकं पृच्छति ।

तुमुन्नन्ताव्ययानि – सः कर्म कर्तुम् इच्छति ।

– अहं संस्कृतेन वक्तुम् इच्छति ।

– शिशुः कथां श्रोतुम् इच्छति ।